## गमः क्वौ। (४०/२९८६)

गमः क्वौ परतः अनुनासिकलोपो भवति। [1]अङ्गगत्। कलिङ्गगत्। अध्वगतो हरवः।

[७८३] गमादीनामिति वक्तव्यम्। (म.भा.३.१९६)

इहापि यथा स्यात्, संयत्। [2]परीतत्।

[७८४] [3]ऊ च गमादीनामिति वक्तव्यम्। (म.भा.३.१९६)

'अग्रेगूः' (तै.सं.१.१.५.१)। [4]अग्रेभ्रूः॥

## विड्वनोरनुनासिकस्यात्। (४१/२९८२)

विटि वनि च प्रत्यये परतः अनुनासिकान्तस्याङ्गस्य आकार आदेशो भवति। 'अब्जा गोजा [5]ऋतजा अद्रिजा' (ऋ.४.४०.५)। 'गोषा इन्दो नृषा असि' (ऋ.९.२.१०)। कूपखाः। [6]शतखाः। सहस्रखाः। दधिक्राः। अग्रेगा [7]उन्नेतृणाम्। 'जनसनखनक्रमगमो विट्' (३.२.६७/३४१३) इति विट् प्रत्ययः। 'सनोतेरनः' (८.३.१०८/३६४५) इति [8]षत्वम् 'गोषा इन्दो नृषा असि' (ऋ.९.२.१०) इत्यत्र। बन–विजावा। [9]अग्रेजावा। 'अन्येभ्योऽपि दृश्यन्ते' (३.२.७५/२९८०) इति वनिप् प्रत्ययः। अनुनासिकस्य इति वर्तमाने पुनरनुनासिकग्रहणमनुनासिकमात्रपरिग्रहार्थम्, अन्यथा हि अनुदात्तोपदेशवनतितनोत्यादीनामेव [10]स्यात्॥

## जनसनखनां सञ्झलोः। (४२/२५०४)

झलि [11]क्ङिति इति चानुवर्तते। जन सन खन इत्येतेषामङ्गानां सनि झलादौ क्ङिति [12]झलादौ प्रत्यये परतः आकार आदेशो भवति। जन्–जातः। जातवान्। जातिः। सन्–[13]सनि सिषासति। सातः। सातवान्। सातिः। खन्–खातः। खातवान्। खातिः। झल्ग्रहणं सन्विशेषणार्थं [14]किमर्थ[15]मनुवर्त्यते? इह मा भूत्, जिजनिषति। सिसनिषति। चिखनिषति। सनोतेः सनीवन्तर्ध (७.२.४९/२६१८) इति[16] पक्षे इडागमः। तदिह सनोत्यर्थमेव [17]सन्ग्रहणम्। [18]अत्र झलादौ क्ङिति[19] सनोते[20]र्विप्रतिषेधाद् आत्वमनुनासिकलोपं बाधते। 'घुमास्थागापाजहातिसां हलि' (६.४.६६/२४६२) [21]इति हल्ग्रहणं ज्ञापकम् अस्मिन्नसिद्धप्रकरणे विप्रतिषेधो भवति इति॥

---

1. जनगत् ह. 2. परिणत् प्रतीतत् ह. 3. ऊङ ब. क. ड. म. भा. 4. अग्रभ्रूः ह. 5. ऋतजा नास्ति फ. 6. नास्ति फ, गतखाः ह. 7. उत् नास्ति ब. 8. षः क. 9. अग्रेयावा फ. ह. क. 10. हि इत्यधिकम् ह. 11. क्ङिति नास्ति फ. 12. झलादौ प्रत्यये नास्ति फ. क. 13. सनि सिषासति नास्ति फ.क. 14. किमर्थं नास्ति फ. ह. 15. अनुवर्तते ह. 16. सति इत्यधिकम् ड. 17. झल्ग्रहणम् फ. 18. अन्यत्र फ. क. 19. च इत्यधिकम् क. 20. विप्रतिषेधार्थे फ. 21. इत्यत्र ह.